दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णनवमी
चैत्र 28 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-169 | 1 | अप्रैल 11, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलप्रदेशस्य राज्यसभा- निर्वाचन-याचिकायां हर्षमहाजनाय महती साहाय्यम् अभिषेकमनुसिंघवीमहोदयस्य आवेदनं निरस्तम्

3 इतिहास-विभागेन राहुल साङ्कृत्यायन-जयन्त्याम् आयोजितः विद्वत्सङ्गोष्ठी-अनुभवप्रकटन- कार्यक्रमश्च

4 लुधियाना-नगरस्य नव पर्यटकानां मृत्युः, स्टीमर-नौकायाः विपर्ययेन अभवत् भीषणं दुर्घटनम्

## अलाहाबाद-उच्चन्यायालयस्य न्यायमूर्तिः यशवन्त-वर्मा राष्ट्रपति-द्रौपदी-मुर्मुवर्यायै स्वकीयं त्यागपत्रं प्रदत्तवान्

अलाहाबाद-उच्चन्यायालयस्य न्यायमूर्तिः यशवन्त-वर्मा राष्ट्रपति-द्रौपदी-मुर्मुवर्यायै स्वकीयं त्यागपत्रं प्रदत्तवान्। न्यायमूर्तेः वर्मणः उपरि साम्प्रतं महाभियोगस्य कार्याचरणं जायमानमस्ति। अवधेयमिदं यत् गतवर्षस्य मार्च-मासस्य चतुर्दश-दिनाङ्के नवदिल्लीस्थे तस्य सर्वकारीयावासे दग्धराशिः सम्प्राप्ता । अस्मिन् प्रकरणे सः देहली-उच्चन्यायालयतः अलाहाबाद उच्चन्यायालयं प्रति पुनः प्रेषितः ।

## भारतस्य सर्वोच्चन्यायालयेन जातिगणनां स्थगितुं याचिका अस्वीकृता

सर्वोच्च न्यायालयेन केन्द्रसर्वकारं प्रति जाति-जनगणनां स्थगयितुं निर्दिश्यमाणा याचिका निरस्तीकृता। मुख्यन्यायाधीशस्य सूर्यकान्तस्य, न्यायमूर्ति-जयमाल्य-बागची इत्यस्य सहैव न्यायमूर्ति-विपुल-एम-पञ्चोली इत्यस्य पीठेन च एषा याचिका निरस्तीकृता। अवधेयमिदं वर्तते यत् गत-फरवरी-मासस्य द्वितीये दिनाङ्के अपि सर्वोच्च न्यायालयेन अन्यस्याः जनहित-याचिकायाः उपरि विचारः निराकृतः । तस्यां याचिकायां सप्तविंशत्यधिक-द्विसहस्रतमतम-वर्षस्य सामान्य जनगणनायां नागरिकाणां जाति-प्रदत्तांश-लेखनस्य, वर्गीकरणस्य तथा च सत्यापनस्य प्रक्रियायाः विषये प्रश्नाः उत्थापिताः आसन् ।

## भारत-अमरीका-देशौ पैक्स सिलिका इत्यनेन सह व्यापक-आर्थिक-प्राविधिक सहयोगं वर्धयितुं सहमतिं प्रकटितवन्तौ।


भारत-अमरीका-देशौ पैक्स सिलिका इत्यनेन सह व्यापक-आर्थिक-प्राविधिक सहयोगं वर्धयितुं सहमतिं प्रकटितवन्तौ। अस्मिन् सहयोगे कृत्रिम-प्रज्ञा सहैव महत्त्वपूर्ण-खनिजानां क्षेत्राणि सम्मिलितानि वर्तन्ते। एतेषु प्रकरणेषु भारतस्य विदेशसचिवस्य विक्रम-मिस्री इत्येतस्य अमरीकायाः आर्थिक-प्रकरणानां अवर-विदेश-सचिवेन जैकब एस. हेलबर्ग इत्यमुना सह चर्चा सञ्जाता। अवधेयास्पदमिदं वर्तते यत् भारतं गत-फरवरी-मासे एआई-इम्पैक्ट सम्मेलनावधौ औपचारिकरूपेण पैक्स-सिलिकायां सम्मिलितम् ।

## विद्युत् आपूर्तिः स्थिरा विद्यते। पश्चिम एशिया-सङ्कटेऽपि विद्युदुत्पादनस्य आवश्यकताः पूरिताः - पीयूष-सिंहः



सर्वकारेण स्पष्टीकृतं यत् पश्चिम एशिया-सङ्कटकालेऽपि देशस्य विद्युत्सम्बद्धा याचना सफलतापूर्वकं पूरिता। नवदेहल्याम् आयोजिते अन्तर्मन्त्रालय-स्तरीये कार्यक्रमे विद्युत-मन्त्रालयस्य अतिरिक्त-सचिवः पीयूष-सिंहः अवदत् यत् सर्वाणि औष्णिक विद्युत-यन्त्राणि पूर्ण-सामर्थ्येन कार्यं कुर्वन्ति, सहैव तेषां पार्श्वे पर्याप्तः कृष्णाङ्गारक-भण्डारः विद्यते। तेन विशेषतः उल्लेखितं यत् आगामि-त्रि-मासाभ्यन्तरे औष्णिक-सौर-पवन-जल-विद्युत-क्षेत्रेषु द्वाविंशति-सहस्रं मेगावाट परिमितं नूतनोर्जा क्षमतां योजयितुं सर्वकारस्य योजना वर्तते। अनेनैव सह पेट्रोलियम-मन्त्रालयस्य संयुक्त सचिवः सुजाता शर्मा सूचितवती यत् देशे इन्धनापूर्तिः स्थिरा वर्तते। सा अवदत् यत् विगत-मासतः षडाधिकैकशत-सहस्र-टन-परिमितं वाणिज्यिक एलपीजी-वातेन्धन-आपूर्तिः कृताऽस्ति । वैदेशिक-विषयेषु च विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् भारतं पश्चिम एशिया-स्थितेः सूक्ष्म-निरीक्षणं कुर्वदस्ति ।

## केन्द्रीय-गृहमन्त्री भारतीय जनतापार्टीति दलस्य वरिष्ठनेता अमितशाहः पश्चिमबङ्गालस्य विधानसभा-निर्वाचनेभ्यः दलस्य 'सङ्कल्प-पत्रम्' प्राकाशयत्



केन्द्रीय-गृहमन्त्री भारतीय जनतापार्टीति दलस्य वरिष्ठनेता अमितशाहः पश्चिमबङ्गालस्य विधानसभा-निर्वाचनेभ्यः

दलस्य 'सङ्कल्प-पत्रम्' प्राकाशयत्। अस्मिन् सङ्कल्प-पत्रे भाजपा-दलेन प्रतिश्रुतं यत् राज्ये सत्ता-प्राप्तेः षण्मासाभ्यन्तरे एव सप्तम वेतनायोगः समान-नागरिक संहिता च प्रवर्तयिष्यते। श्रीशाहः अवदत् यत् सम्प्रति राज्यस्य जनाः भीताः सन्ति सहैव अन्तःकरणेन परिवर्तनं च वाञ्छन्ति। सः विशेषतः उल्लेखितवान् यत् विगत-दशवर्षेषु भारतीय जनता पार्टीति दलेन पश्चिमबङ्गाले रचनात्मक-विपक्षरूपेण स्वस्य स्थानं निर्मितम्, दलमिदं च मुख्यविपक्षस्य रूपेण कार्यं कुर्वदस्ति ।

## राज्यसभा-अध्यक्षेण सी.पी. राधाकृष्णन वर्येण नवनामांकिताय हरिवंश-वर्याय बिहारराज्यस्य मुख्यमन्त्रिणे नीतीशकुमाराय च शपथग्रहणं कारितम्।



राज्यसभा-अध्यक्षेण सी.पी. राधाकृष्णन वर्येण नवनामांकिताय हरिवंश-वर्याय

बिहारराज्यस्य मुख्यमन्त्रिणे नीतीशकुमाराय च शपथग्रहणं कारितम्। राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः उच्च सदनस्य पूर्व-उपाध्यक्ष हरिवंशं पुनः राज्यसभायाः सदस्यरूपेण न्ययोजयत्। उच्चसदनस्य सदस्यरूपेण हरिवंशस्य कार्यकालः गतदिने एव समाप्तः। भारतस्य पूर्व मुख्यन्यायाधीशस्य रञ्जन गोगोई वर्यस्य सेवानिवृत्तेः परं रिक्तस्थाने हरिवंशः नियोजितः । शपथग्रहण कार्यक्रमे केन्द्रीय मंत्री निर्मला सीतारामणः, जे.पी. नड्डा च उपस्थितौ आस्ताम्।

## सुभाषितम्

**जीवने यावदादानं स्यात्, प्रदानं यत् ततोऽधिकम्।**
**इत्येषा प्रार्थनास्माकं, भगवन्परिपूर्यताम्।।**

भावार्थः- हे परमेश्वर! आजीवन मुझे जो कुछ भी धन संपत्ति प्राप्त हो उस से भी अधिक मैं दूसरों को देता रहूं। आपसे प्रार्थना है कि मेरी यह इच्छा आप पूर्ण कर दें।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## बैडमिंटन-एशिया-चैम्पियनशिप-प्रतियोगितायाम् आयुष-शेट्टी इत्येषः पुरुषैकल-क्रीडायाम् उपान्त्यचक्रीय-चरणे प्रविष्टवान्



बैडमिंटन-एशिया-चैम्पियनशिप-प्रतियोगितायाम् आयुष-शेट्टी इत्येषः पुरुषैकल-क्रीडायाम् उपान्त्यचक्रीय-चरणे प्रविष्टवान्।

# हिमाचलप्रदेशस्य राज्यसभा- निर्वाचन- याचिकायां हर्षमहाजनाय महती साहाय्यम्

## अभिषेकमनुसिंघवीमहोदयस्य आवेदनं निरस्तम्



**हिमसंस्कृतवार्ताः- शिमला।** भारतीयजनतापक्षस्य वरिष्ठनेता राज्यसभासांसदः च हर्षमहाजनः निर्वाचनयाचिकाप्रकरणे महत्त्वपूर्णां साहाय्यम् प्राप्तवान्। तस्य अधिवक्ता विक्रान्तठाकुरः सूचितवान् यत् राज्यसभा- निर्वाचनं परितः प्रचलन्त्यां याचिकायां अद्य माननीयन्यायालयः अभिषेकमनुसिंघवीमहोदयेन प्रस्तुतं तत् आवेदनं निरस्तवान्, यस्मिन् साक्षिणां आवश्यकतां प्रति आपत्तिः प्रदर्शिता आसीत्। विक्रान्तठाकुरः अवदत् यत् अभिषेकमनुसिंघवीपक्षतः अयं तर्कः दत्तः आसीत् यत् अस्मिन् प्रकरणे साक्षिणां विस्तृतानां प्रमाणानां च आवश्यकता नास्ति। अस्मिन् विषये न्यायालये विस्तृता चर्चा अभवत्। अद्यतननिर्णये माननीयन्यायालयः स्पष्टीकृतवान् यत् निर्वाचनयाचिका एकं 'ट्रायल' प्रकृतेः प्रकरणं वर्तते, यस्मिन् साक्ष्याणां साक्षिणां च भूमिका अतीव महत्त्वपूर्णा भवति। न्यायालयेन एतदपि स्वीकृतं यत् हर्षमहाजनपक्षतः प्रत्ता साक्षिणां सूची उचिता, वैधा, प्रक्रियानुकूला च अस्ति। अतः सिंघवीमहोदयस्य आवेदनं निरस्तं जातम्। भाजपापक्षतः एषा महत्त्वपूर्णा कानूनी-विजयः इति उक्ता। अधिवक्ता विक्रान्तठाकुरः अकथयत् यत् न्यायालयः स्पष्टं कृतवान् यत् निर्वाचन-सम्बन्धिप्रकरणेषु साक्ष्याणां साक्षिणां च उपेक्षा कर्तुं न शक्यते। राज्यसभासांसदः हर्षमहाजनः अस्मिन् निर्णये स्वप्रतिक्रियां दत्त्वा अवदत् यत्- "सत्यस्य दमनस्य सर्वः अपि प्रयासः विफलः भविष्यति। कांग्रेसपक्षस्य नेतारः न्यायालये अपि सत्यात् दूरीभवितुं प्रयतन्ते स्म, किन्तु न्यायालयेन स्पष्टं कृतं यत् सत्यं पूर्णपारदर्शितया सह सम्मुखं आगमिष्यति। एषा केवलं वैधानिकी विजयः नास्ति, अपि तु लोकतन्त्रस्य विजयः अस्ति।" अस्मात् निर्णयात् परं अधुना प्रकरणस्य अग्रिमा श्रवणं साक्ष्याणां साक्षिणां च आधारेण भविष्यति।

# पञ्चायतनिर्वाचनविषये भाजपा भ्रममुत्पादयति, विनयकुमारस्य डॉ. बिन्दलस्य वक्तव्ये प्रतिप्रहारः



**हिमसंस्कृतवार्ताः- शिमला।** प्रदेशकाङ्ग्रेस- पक्षेण पञ्चायतीराज- स्थानीय- निकायनिर्वाचनं च अधिकृत्य भाजपा-पक्षस्य उपरि जनानां दिशाभ्रमीकरणस्य आरोपः कृतः। तत्रैव भाजपा-प्रदेशाध्यक्षस्य वक्तव्ये हिमाचलकाङ्ग्रेस- अध्यक्षः विनयकुमारः प्रतिप्रहारं कृतवान्। विनयकुमारः उक्तवान् यत् प्रदेशे नगरनिकायेषु पञ्चायतीराजसंस्थासु च निर्वाचनेषु स्वकीयां पराजयं निश्चितं मत्वा भाजपापक्षः राज्यस्य काङ्ग्रेस-सर्वकारस्य उपरि मिथ्यारोपान् करोति। तेन कथितं यत् मुख्यमन्त्री सुखविन्दरसिंहसुक्खु महोदयः पूर्वमेव स्पष्टीकृतवान् यत् निर्वाचनानि ३१ मई-दिनाङ्कात् पूर्वमेव संपादयिष्यन्ते। सः भाजपा-अध्यक्षस्य राजीवबिन्दलस्य तं आरोपं पूर्णतः आधारहीनं तथ्यहीनं च उक्तवान्, यस्मिन् तेन 'आरक्षणतालिका' (Roster) विषये प्रश्नाः उत्थापिताः निर्वाचनस्य 'अपहरणस्य' च आरोपः कृतः आसीत्। विनयकुमारः अवदत् यत् निर्वाचन-रोस्टर- निर्धारणे पूर्णतया पारदर्शिता वर्तते, अस्मिन् सर्वेषां वर्गाणां, जातीनां नारीणां च सहभागिता सुनिश्चिता कृता अस्ति।काङ्ग्रेस-प्रदेशाध्यक्षः उक्तवान् यत् भाजपा निर्वाचनविषये प्रदेशस्य जनान् भ्रामयितुं न शक्नोति। सः अवदत् यत् काङ्ग्रेस-पक्षेण सदैव लोकतन्त्रस्य सम्मानं कृतं, लोकतन्त्रे च जनमतमेव सर्वोपरि भवति। भाजपा-पक्षस्य स्वभावः अस्ति यत् सः कस्मिन्नपि विषये राजनैतिकलाभं प्राप्तुं चेष्टते, परन्तु अधुना एतत् बहुकालं यावत् न चलिष्यति। तेन भाजपा-पक्षस्य उपरि राज्यस्य अर्थव्यवस्थायाः विनाशस्य आरोपः कृतः, उक्तं च यत् भाजपा प्रदेशस्य हितेभ्यः अपि पलायनं करोति। सः अन्ततः अवदत् यत् प्रदेशस्य जनाः भाजपा-पक्षस्य वास्तविकं स्वरूपं दृष्टवन्तः, अतः इदानीं जनाः कस्यापि भ्रमे न आगमिष्यन्ति।

# नवदेहल्यां सिन्धी-भाषायाः भारतस्य संविधानस्य नवीनतमं संस्करणं प्रकाशितम्




उपराष्ट्रपतिः सी.पी. राधाकृष्णन इत्यसौ नवदेहल्यां सिन्धी-भाषायाः भारतस्य संविधानस्य नवीनतमं संस्करणं विमुक्तवान्। अत्रावसरे भाषमाणः श्रीराधाकृष्णन इत्येषः अवदत् यत् सिन्धी भाषा विश्वस्य प्राचीनतमासु मधुरतमासु च भाषासु अन्यतमा वर्तते। सः विशेषतः उल्लेखितवान् यत् भारतस्य स्वतन्त्रतायाः परं प्रथमतया देवनागरी-लिप्यां भारतीय-संविधानस्य सिन्धी-संस्करणं प्रकाशितम् । उपराष्ट्रपतिः प्रावोचत् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना एतस्य पवित्राभिलेखस्य विविधासु भाषासु उपलब्धतायै विशेष-प्रयत्नः विहितः । अनेन पदक्षेपेण प्रत्येके नागरिकाः स्वभाषया देशस्य आदर्शान् सम्यगवगन्तुं समर्थाः भविष्यन्ति । अवसरेऽस्मिन् विधि-न्याय-मन्त्री अर्जुनराम मेघवालः अवदत् यत् अयं कार्यक्रमः न केवलं भाषात्मक-रिक्थस्य उत्सवः वर्तते, अपितु देशस्य एकतायाः सांस्कृतिक विविधतायाः च प्रमाणमपि वर्तते। यदा संविधानं सर्वासु भाषासु उपलब्धं भविष्यति, तदा सामान्य जनाः अपि स्व-अधिकाराणां ज्ञाने सक्षमाः भविष्यन्ति ।

# कतर-देशः भारतस्य विश्वसनीय-ऊर्जा आपूर्तिकर्तृरूपेण प्रतिबद्धतां पुनः दृढीकरोति -हरदीपसिद्ध-पुरी

पेट्रोलियम-प्राकृतिकगैस-मन्त्री हरदीपसिद्ध-पुरी अवदत् यत् कतर्-देशः भारतस्य विश्वसनीय-ऊर्जा-आपूर्तिकर्तृरूपेण स्वस्य प्रतिबद्धतां पुनः दृढीकृतवान्। दोहा-नगरे साद-शेरिदा-अल-काबी इत्यनेन सह वार्तायाः अनन्तरं प्रवदन् श्रीपुरी अवदत् यत् उभौ पक्षौ ऊर्जा-व्यापार-निवेश-जनसम्पर्कादीनां सामरिक सम्बन्धानां च पूर्ण-स्थितेः समीक्षाम् अकुर्वताम्। सः अवदत् यत् भारत-कतर-देशौ अपि पश्चिम-एशियादेशे शीघ्रमेव शान्तेः स्थिरतायाः च आशां प्रकटितवन्तौ, अपि च अमरीका-इरान्-देशयोः मध्ये सप्ताहद्वयोः युद्धविरामस्य स्वागतं कृतवन्तौ। उभौ पक्षौ वैश्विक आपूर्तिशृङ्खलायाः अनुरक्षणार्थं निर्बाध-वैश्विक ऊर्जा आपूर्तिः, नौपरिवहनस्वातन्त्र्यं, वाणिज्यस्य सुगमप्रवाहः च सुनिश्चितुम् आवश्यकतायाम् बलं प्रदत्तवन्तौ।

# तिब्बतीधर्मगुरुः दलाईलामा धौलाधारपर्वतस्य हिममयाः उपत्यकाः न्यभालयत्

**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमालयस्य रमणीयानां वीथीनां मध्ये स्थिते 'मैक्लोडगंज' स्थाने शुक्रवासरे प्रातः तिब्बतीधर्मगुरुः १४ तमः दलाईलामा महोदयः धौलाधारपर्वतस्य हिमाच्छादितान् शृङ्गानां सौन्दर्यस्य आनन्दं गृह्णन् दृष्टः। मन्द-आतपस्य शीतवायूनां च मध्ये दलाईलामा सुचिरं यावत् प्रकृतेः अलौकिके सौन्दर्ये मग्नः आसीत्। सामाजिक- माध्यमेषु (Social Media) तस्य एषः शान्तः आनन्दमयः च मुद्रा (अन्दाज) बहुचर्चितः अभवत्। धर्मशालायाः एताः हिममयाः उपत्यकाः विश्वभरस्य पर्यटकानां ध्यानं स्वं प्रति आकर्षयन्ति।



# इतिहास-विभागेन राहुल साङ्कृत्यायन-जयन्त्याम् आयोजितः विद्वत्सङ्गोष्ठी- अनुभवप्रकटन- कार्यक्रमश्च





सरदार पटेल- विश्वविद्यालय मण्डी इत्यस्य इतिहास- विभागेन महतः यायावरस्य, बहुभाषाविदस्य, प्रख्यात- साहित्यकारस्य च राहुल साङ्कृत्यायनस्य जयन्त्याः उपलक्ष्ये विद्वत्सङ्गोष्ठी अनुभव- प्रकटनकार्यक्रमश्च आयोजितः। अस्य कार्यक्रमस्य मुख्योद्देश्यं छात्रान् तेषां बौद्धिक- योगदानेन, यात्रा- आधारित- ज्ञानपरम्परया, भारतीय- इतिहासलेखने तेषां महत्त्वेन परिचेतुम् आसीत्। अस्मिन् अवसरे ग्वालियर- शैक्षणिक- भ्रमणस्य सहभागिनः छात्राः सक्रियतया सम्मिलिताः अभवन्।

कार्यक्रमस्य मुख्यातिथयः कुलपतिः आचार्यः ललितकुमार अवस्थीमहोदयः स्वकीये प्रेरकसन्देशे अकथयत् यत् राहुल साङ्कृत्यायनस्य जीवनम् अस्य तथ्यस्य साक्षात् प्रमाणम् अस्ति यत् ज्ञानं केवलम् औपचारिक- अध्ययनपर्यन्तं सीमितं न भवति, अपि तु निरन्तर-यात्रायाः, अनुभवस्य, जिज्ञासायाः च माध्यमेन तत् विस्तृतं समृद्धं च जायते। सः छात्रान् आहूतवान् यत् ते स्व- शैक्षणिकभ्रमणस्य अनुभवान् गम्भीरतया लेखनीबद्धं कुर्युः, तान् च प्रकाशनयोग्यरूपेण उपस्थापयेयुः, येन अनुभवजन्यज्ञानस्य विस्तारः भवेत्।कार्यक्रमस्य मुख्यवक्ता छात्रकल्याण- अधिष्ठाता आचार्यः राजेशकुमारशर्मा स्वकीये सारगर्भित- व्याख्याने राहुल-साङ्कृत्यायनस्य बहुआयामि- व्यक्तित्वस्य, तेषां दार्शनिकदृष्टेः तथा च यात्रा- आधारित- ज्ञानमीमांसायाः उपरि प्रकाशं निक्षिप्तवान्। ते स्पष्टीकृतवन्तः यत् साङ्कृत्यायनस्य यात्रावृत्तान्ताः केवलं वर्णनात्मक- साहित्यं न सन्ति, अपि तु भारतीय-इतिहासस्य सांस्कृतिक- अध्ययनस्य च महत्त्वपूर्णाः स्रोतः सन्ति, ये ज्ञानपरम्परायै नवीनां दृष्टिं प्रददति।

कार्यक्रमस्य संयोजकः विभागाध्यक्षश्च डॉ. राकेशकुमारशर्मा स्व-उद्बोधने उल्लिखितवान् यत् राहुल-साङ्कृत्यायनस्य जन्म १८९३ तमे वर्षे एप्रिल-मासस्य ९ दिनाङ्के आजमगढ़-मण्डले अभवत्। तेषां मूलनाम 'केदारनाथ पाण्डेयः' आसीत्। बौद्धधर्मं प्रति आकर्षणवशात् तैः 'राहुलः' इति नाम धृतम्। ते हिन्दी- संस्कृत- पालि- तिब्बती- भाषाणाम् असाधारणाः विद्वांसः आसन्। तैः शताधिक-ग्रन्थानां रचना कृता। ते राहुल साङ्कृत्यायनस्य मण्डी-प्रवासस्य संस्मरणानि साझां कुर्वन्तः उक्तवन्तः यत् कथमपि तेषां प्रभावेण मण्डीनगरे पुरातत्त्व-संरक्षणस्य साहित्य-सृजनस्य च कार्यम् अभवत्।

अस्मिन् अवसरे छात्राः स्व-शैक्षणिक-अनुभवान् व्यक्तं कुर्वन्तः ग्वालियर-परिक्षेत्रस्य (Circle) ऐतिहासिक- धरोहराणाम् अध्ययनं ज्ञानवर्धकं दृष्टि- विस्तारकं च अनुभवम् अवदन्। प्रतिभागिषु छात्रेषु सानू कुमारः, दीपक दीपांशुः, नीरजः, कल्पना, खुशबू, गौरवः, शिवकुमारः, लखविन्दरः, मनीषा, शोधार्थिनः वेदः, राहुल, डोल्मा, अन्ये च छात्राः विचारपूर्णां सहभागितां कृतवन्तः। सर्वैः अयं सङ्कल्पः कृतः यत् ते स्वानुभवान् व्यवस्थितरूपेण लिपिबद्धं कृत्वा शैक्षणिक- साहित्यरूपेण विकसिष्यन्ति। डॉ. रामपालः औपचारिकं धन्यवादज्ञापनं कुर्वन् सर्वेषाम् अतिथीनां, वक्तॄणां छात्राणां च प्रति कृतज्ञतां प्रकटितवान्।

# सकारण- आदेशः' (Speaking Order) आधारेण प्रलम्बिताः वित्तीयलाभाः निर्गच्छन्तु- आशीषकोहली



**हिमसंस्कृतवार्ताः- शिमला।** विद्यालयीय- शिक्षानिदेशकः आशीषकोहली सर्वेभ्यः उपनिदेशकेभ्यः वरिष्ठ- माध्यमिक- विद्यालयानां प्रधानाचार्येभ्यः च आदेशं दत्तवान् यत् 'सकारण- आदेशः' इति आधारेण प्रलम्बिताः वित्तीयलाभाः निर्धारितसमये निर्गताः भवन्तु। निदेशकेन उक्तं यत् बहुषु प्रकरणेषु आदेशे निर्गते सत्यपि आहरण-वितरण-अधिकारिभिः (DDO) समये भुक्तिः न क्रियते। अनेन विभागस्य केवलं असुविधा न भवति, अपि तु अनावश्यक- न्यायिकप्रकरणेषु अपि विभागः संलग्नो भवति। अनेकवारं न्यायालयः 'दण्डशुल्कम्' (Cost) अपि प्रयुनक्ति। निदेशकः अवदत् यत् यदि भविष्ये कस्मिन्नपि प्रकरणे उच्चन्यायालयद्वारा प्रतिकूल- आदेशः निर्गच्छति, तर्हि सम्बन्धितः डी. डी. ओ. (DDO), उपनिदेशकः अन्ये च उत्तरदायिनः अधिकारिणः तदर्थं दण्डिताः भविष्यन्ति। दण्डराशेः स्वीकरणम् अपि तेभ्यः एव भविष्यति। सर्वेभ्यः उपनिदेशकेभ्यः निर्देशः दत्तः यत् यत्र 'सकारण-आदेशः' निर्गताः सन्ति, तत्र दिनद्वयस्य अन्तः 'चार्ज्ड हेड' मध्ये धनराशेः अभ्यर्थना प्रेषणीया, येन भुक्तिप्रक्रियायां विलम्बः न भवेत्।

# विदेशमन्त्री एस्. जयशङ्करः अवदत् यत् ऊर्जा सुरक्षां वर्धयितुं भारतं मारिशसदेशेन सह तैलेन्धन-सन्धिं करोति



विदेशमन्त्री एस्. जयशङ्करः अवदत् यत् पश्चिम एशिया- सङ्कटकाले ऊर्जा-सुरक्षां वर्धयितुं भारतं मारिशस-देशेन सह तैल- ईंधन आपूर्ति-सन्धिं करोति। पोर्ट-लूयिस्-नगरे भाषमाणः, सः समुद्रीय-स्वास्थ्य-शिक्षा-सहकारेण सह द्वैपाक्षिक-सम्बन्धेषु प्रगतिम् अधोरेखितवान्, अपि च भारतीय-सार्वजनिक उपक्रमः मारिशस्-देशस्य प्रथम-तरण-सौर-परियोजनायाः विकासं कुर्वन् अस्ति इत्यपि अवोचत्। गतवर्षे नरेन्द्रमोदिनः भ्रमणकाले, सम्बन्धानाम् औन्नत्यं सामरिकसहभागित्वस्य च संवर्धनम् अपि स्मृतवान्। डा. जयशङ्करः नवमे हिन्दमहासागरसम्मेलने भागं भजिष्यति मुख्यभाषणं करिष्यति, समकक्षैः सह वार्तालापं च करिष्यति ।

# पदोन्नताः प्रधानाचार्याः यदि पदभारं न गृह्णन्ति तर्हि आदेशाः निरस्ताः भविष्यन्ति, शिक्षाविभागेन कठोरता प्रदर्शिता

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशस्य शिक्षाविभागे ये प्रधानाचार्याः पदोन्नत्यनन्तरं निर्धारितसमये नूतन-पदस्थापने पदभारं न स्वीकृतवन्तः, तेषां पदोन्नति-आदेशाः निरस्ताः भविष्यन्ति। एतादृशप्रकरणेषु अन्येभ्यः पात्रशिक्षकेभ्यः पदोन्नत्याः अवसरः प्रदास्यते। विभागेन पदोन्नतान् प्रधानाचार्यान् प्रति कठोरं पक्षं स्वीकृतम् अस्ति। सद्यः एव विभागेन ७७१ प्रधानाचार्यान् पदोन्नतिं दत्त्वा विविधेषु विद्यालयेषु स्थानान्तरितं कृतम्। तदनु महत्यां संख्यायां पदोन्नत- अधिकारिभिः 'समायोजनाय' चिकित्साधारस्य आश्रयः स्वीकृतः इति विषयाः प्रकाशम् आगताः। इमां प्रवृत्तिं रोद्धुमेव विभागेन इयं कठोरता प्रदर्शिता। विभागीय-अधिकारिणाम् अनुसारं बहवः पदोन्नताः प्रधानाचार्याः दुर्गमक्षेत्रेषु पदस्थापनात् रक्षितुं 'चिकित्सा- प्रमाणपत्राणि' उपस्थापयन्ति। विभागः एतत् गम्भीरतया स्वीकृत्य एतादृशप्रकरणानां निरीक्षणं प्रारब्धवान्। अधिकारिणां मतम् अस्ति यत् अनावश्यक- चिकित्साधारेण समायोजनस्य अभ्यर्थनया शिक्षाव्यवस्था प्रभाविता भवति विद्यालयेषु च पदानि रिक्तानि तिष्ठन्ति। शिक्षामन्त्री रोहितठाकुरः उक्तवान् यत् सर्वकारः पारदर्शितया उत्तरदायित्वेन च सह शिक्षाव्यवस्थां सुदृढीकर्तुं इच्छति। यः कोऽपि प्रधानाचार्यः पदोन्नत्यनन्तरं नूतनस्थाने कार्यभारं न स्वीकरिष्यति, तस्य पदोन्नतिः निरस्ता भविष्यति तस्य स्थाने अन्यस्मै पात्रशिक्षकाय अवसरः दीयते। शिक्षामन्त्रिणा सर्वेभ्यः जिला- उपनिदेशकेभ्यः निर्देशः दत्तः यत् पदोन्नत-प्रधानाचार्याणां कार्यभारग्रहणे (Joining) दृष्टिः रक्षितव्या तथा समय-समये प्रतिवेदनं मुख्यालयं प्रेषणीयम्। सहैव सन्दिग्ध- चिकित्साप्रमाणपत्राणां निरीक्षणं कृत्वा उचितकार्याचरणस्य अपि आदेशाः दत्ताः।

संस्कृतभारती
जयतु संस्कृतं विश्वपोषकम्।

## अयि मित्र! मे रोचते हि संस्कृतभारतीसङ्घटनम्

संस्कृतेन नु यत् समृद्धम्
संस्कृताय च कार्यरतम् ।
अयि मित्र! मे रोचते हि
संस्कृतभारतीसङ्घटनम् ।।
सम्भाषणशिबिरमादिसोपानम्
भवति लघुवाक्यज्ञानम्
अयि मित्र! मे रोचते हि
संस्कृतभारतीसङ्घटनम् ।।
प्रकल्पो द्वितीयः प्रबोधनवर्गः
उच्यते संस्कृतमहर्निशम्
अयि मित्र! मे रोचते हि
संस्कृतभारतीसङ्घटनम् ।।
वाराणस्यां तथा इन्द्रप्रस्थे
संवादशाला तु आवर्षम्
अयि मित्र! मे रोचते हि
संस्कृतभारतीसङ्घटनम् ।।
क्षेत्रशो भवति प्रशिक्षणवर्गः
प्रगतवर्गश्चानन्तरम्
अयि मित्र! मे रोचते हि
संस्कृतभारतीसङ्घटनम् ।।
ग्रामे प्रान्ते देशे विश्वे
पत्राचारेण संस्कृतम्
अयि मित्र! मे रोचते हि
संस्कृतभारतीसङ्घटनम् ।।
६)हरियाणाराज्ये जयभगवान्
गीतानि रचयति अनारतम्
अयि मित्र! मे रोचते हि
संस्कृतभारतीसङ्घटनम् ।।

लेखकः- पं० जय भगवान शास्त्री, कैथल ( हरियाणा)
संस्कृताध्यापकः
सम्पर्कसूत्रम् - 9991829095

# लुधियाना-नगरस्य नव पर्यटकानां मृत्युः, स्टीमर-नौकायाः विपर्ययेन अभवत् भीषणं दुर्घटनम्



मथुरा। उत्तरप्रदेशस्य मथुराजनपदस्य वृन्दावनक्षेत्रे शुक्रवासरे अपराह्णे यमुनानद्यां त्रिंशत् (30) पर्यटकानां भारवहा 'स्टीमर'-नौका विपर्यस्ता अभवत्। अस्मिन् दुर्घटने नव पर्यटकानां निमज्जनकारणतः मृत्युः अभवत्। मृतेषु षट् महिलाः त्रयः पुरुषाः च सन्ति। मथुरायाः जिलाधिकारी चन्द्रप्रकाश सिंहः एतस्य पुष्टिं कृतवान्। नौकायां सवारः सर्वे पर्यटकाः पञ्जाबराज्यतः भ्रमणार्थम् आगताः आसन्।

आरक्षक-सूत्रैः ज्ञातं यत् एषा दुर्घटना अपराह्णे पादोन-त्रिवादने 'केसी-घट्टे' अभवत्, यत् श्रीबांकेविहारीमन्दिरात् सार्ध-द्वि-किलोमीटर दूरे अस्ति। SDRF तथा NDRF दलानां सैनिकाः घटनास्थले बचाव-राहतकार्ये संलग्नाः सन्ति, येषां साहाय्यं स्थानीय-आरक्षकाः पञ्चाशत् (50) निमज्जकाः (divers) च कुर्वन्ति। गुलाब-नामकः निमज्जकः अवदत् यत् निमग्नाः पञ्चदश (15) जनाः सुरक्षितं बहिः निष्कासिताः।

एकः पीडितः पर्यटकः अवदत् — "वयं सर्वे जगराओं (लुधियाना) नगरात् आगताः स्मः। वायुः वेगेन वहति स्म। यमुनायाः मध्ये तीव्रवायुना नौका अकस्मात् डगमगायमाना अभवत्। तस्याः गतिः अपि वर्धिता। तदैव सा नौका 'पीपा-सेतुना' सह संघट्ट्य विपर्यस्ता अभवत्।"



## "लौकिकन्यायकोशः"
## "मधुकरराज-धुमक्षिकान्यायः"

यथा मधुमक्षिकाः मधुकरराजस्य आज्ञां पालयन्ति यथा सर्वाणि इन्द्रियाणि चित्तस्य आज्ञां पालयन्ति। अयम् अर्थः योगशास्त्रे विस्तारेण वर्णितः। भगवद्गीतायाम् अपि इन्द्रियेभ्यः परं मनः इत्यत्र {३-४२} अयम् अर्थः दृश्यते।

डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
काव्या- नमस्ते नन्दिनि। अद्य बह्व्यः विचित्राः वार्ताः मया श्रुताः।
नन्दिनी- आम्। प्रथमं तु केनचित् भारतीय-छात्रेण फ्रान्स-देशस्य शिक्षाव्ययः अन्तर्जाले प्रदर्शितः। पञ्चचत्वारिंशत्-लक्ष-रूप्यकाणां भारं ज्ञात्वा जनैः तीव्रा प्रतिक्रिया दत्ता।
काव्या- सत्यम्, विदेशे शिक्षा-मूल्यं तु सुमहत् अस्ति। किन्तु स्वदेशे अपि कार्य-स्थले काचित् विस्मयकरी घटना घटिता। गुरुग्राम-नगरे एकेन संस्थापकेन कश्चित् कर्मचारी 'गृहात् कार्यम्' इति निवेदनस्य अनन्तरं निमेषद्वये एव निष्कासितः।
नन्दिनी- अहो कष्टम्! तेन संस्थापकेन अतीव क्रूरता आचरिता। अमेरिका-देशे अपि भारतीयानां स्थितिः कठिना जाता। यतो हि तत्र कर्म-च्युतेः अनन्तरं भारतीय-दम्पती भारतं प्रति प्रत्यागन्तुं विवशीभूतौ। तौ षष्टि-दिनानां समय-सीमां प्राप्तवन्तौ स्तः।
काव्या- विदेशे आजीविका-नाशः तु अतीव खेदजनकः। किन्तु अधिकारिणां व्यवहारः अपि अद्यतन-वार्तासु चर्चितः अस्ति। एकेन स्वामिना कस्यचित् कर्मकरस्य विवाह-दिने अपि तस्य कार्यं प्रशंसितम्। ततः जनाः क्रुद्धाः सन्तः 'अयं व्यवहारः विषमयः' इति उक्तवन्तः सन्ति।
नन्दिनी- सत्यम्, अद्य सर्वत्र ईदृशः अहितकरः व्यवहारः एव दृष्टः। अस्तु, अद्यतन-वार्ता-कार्यक्रमाय एतावत् एव। धन्यवादाः।

# मतदानं संवैधानिकः अधिकारः, मतदाता-सूच्याः 'फ्रीजिंग' विरुद्धं याचिकायाः श्रवणं १३ दिनाङ्के



नूतनदेहली। पश्चिमबङ्गालराज्ये आगामि-विधानसभा-निर्वाचनात् पूर्वं निर्वाचन-आयोगस्य 'एसआईआर' (SIR) प्रकरणं तीव्रं सञ्जातम्। अस्मिन् अन्तरे शुक्रवासरे पुनः एकवारं उच्चतम-न्यायालयस्य (सुप्रीम कोर्ट) समक्षम् अस्य विषयस्य उल्लेखः कृतः। मुख्यन्यायाधीश-सूर्यकान्तस्य पीठस्य समक्षं एषः विषयः उपस्थापितः। विचारविमर्शकाले उच्चतम-न्यायालयः अवदत् यत् "मतदानं संवैधानिकः अधिकारः अस्ति तथा च एतत् अन्येभ्यः सर्वेभ्यः वस्तुभ्यः अधिकं महत्त्वपूर्णम् अस्ति।"

तत्रैव, निर्वाचन-आयोगेन मतदाता-सूचिकानां स्तम्भनस्य ('फ्रीजिंग') निर्णयं प्रतिस्पर्शयन्त्याः नवीनायाः याचिकायाः श्रवणं १३ अप्रैल-दिनाङ्के कर्तुं न्यायालयः सम्मतिं दत्तवान्। अन्याः पूर्व-लम्बिताः याचिकाः अपि एतेन सहैव श्रोष्यन्ते।

भारतस्य मुख्यन्यायाधीशः सीजेआई सूर्यकान्तः, न्यायमूर्तिः जयमाल्य बागची तथा न्यायमूर्तिः विपुल एम. पञ्चोली इत्येतेषां पीठात् एकेन अधिवक्त्रा अस्मिन् प्रकरणे त्वरित-श्रवणाय अनुरोधः कृतः। अधिवक्त्रा उक्तं यत् मतदाता-सूच्याः नाम-निष्कासनस्य विरुद्धं बह्व्यः अपीलाः अद्यापि लम्बिताः सन्ति, यदा तु आयोगेन ९ अप्रैल-दिनाङ्के एव सूचीं 'फ्रीज' (स्थगितां) कृतम् अस्ति।

## उत्तरप्रदेशस्य 'SIR' अन्तिम-सूच्यां 2.04 कोटि-नामानि निरस्तानि, प्रदेशे १३ प्रतिशतं न्यूनतायाः सह १३.३९ कोटि-मतदातारः अवशिष्टाः

लखनऊ। उत्तरप्रदेशे निर्वाचन-आयोगेन 'स्पेशल इण्टेंसिव रिवीजन' (SIR) इत्यस्य अन्तिम-सूची शुक्रवासरे प्रसारिता। उत्तरप्रदेशे मतदातॄणां संख्या १३ प्रतिशतं घटित्वा १३.३९ कोटि-परिमिता अभवत्। अन्तिम-सूच्याः २.०४ कोटि-नामानि निष्कासितानि, यदा तु ८४ लक्षं नूतन-नामानि संयोजितानि सन्ति। 'एसआईआर' (SIR) प्रक्रियेतः पूर्वम् अक्तूबर २०२५ मासे उत्तरप्रदेशे कुल १५.४४ कोटि-मतदातारः आसन्।



प्रथम-प्रारूप-सूच्याः (Draft List) प्रकाशनस्य पश्चात् एषा संख्या १२.५५ कोटि-पर्यन्तं न्यूना अभवत्, यस्मिन् २.८९ कोटि-जनानां नामानि निरस्तानि आसन्। अनन्तरं तस्मिन् प्रारूपात् ८४ लक्षं नामानि पुनः संशोध्य अन्तिम-सूच्यां योजितानि।